Digitization by eGangotri-South Center



"वाणीं भजत गैर्वाणीम्"

# नीतिचन्द्रिका

18.3
eM

देवनागरि

संग्राहकः

न्यायवेदान्तशिरोमणिः श्रीनारायणमूर्तिः

प्रकाशिका

संस्कृतभाषाप्रचारिणी सभा,

चित्तूरु. (आ. प्र.)

सर्वेधिकाराः सभायत्ताः

1988

मूल्यम् रु. 2.40

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

प्रथममुद्रणम् 1961
द्वितीयमुद्रणम् 1970
तृतीयमुद्रणम् 1984
चतुर्थमुद्रणम् 1988

## कृतज्ञताञ्जलिः

एतत्पुस्तकसंग्रहेण* सभायै समर्पणेन च महदुपकृत वद्भ्यः न्यायवेदान्तशिरोमणिभ्यः आल्लगड्डु चैतन्य पाठशालास्थापकेभ्यः श्रीमद्भ्यः नारायणमूर्तिभ्यः सादरः कृतञ्जताञ्जलिः समर्प्यते ।

गङ्गास्नानं तथा पानं जपध्यानादिकं सदा ।
क्षेत्रे भिक्षा कुटीवासो हृषीकेशे प्रवर्तते ॥

अयं विशेषः
हरि ॐ तत्सत्

इति

प्रकाशनाधिकारी

---

*संग्राहक नाम संन्यास स्वीकारान्तर श्री स्वामी नारायणानन्द सरस्वतीति । हिमालये हृषीकेशे स्वर्गाश्रमे चैतन्यकुटीरे निवासः ।

विजय मुद्राक्षरशाला, चित्तूरु. (आं'प्र.)

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

ॐ

वाणीं भजत गैर्वाणीम्

# नीतिचन्द्रिका



अजरामरवत् प्राज्ञो विद्यामर्थञ्च साधयेत् ।
गृहीत इव केशेषु मृत्युना धर्ममाचरेत् ॥ 1

अत्यन्तकोपः, कटुका च वाणी
दरिद्रता च, स्वजनेषु वैरम् ।
नीचप्रसङ्गः, कुलहीनसेवा
चिह्नानि देहे नरकस्थितानाम् ॥ 2

अनभ्यासेव वेदानामाचारस्य च वर्जनात् ।
आलास्यादन्नदोषाच्च मृत्युर्विप्राञ्जिघांसति ॥ 3

अनभ्यासे विषं विद्या, अजीर्णे भोजनं विषम् ॥
विषं गोष्ठी दरिद्रस्य, भोजनान्ते जलं विषम् ॥ 4

अनारोग्यमनायुष्यमस्वर्ग्यं चातिभोजनम् ।
अपुण्यं लोकविद्विष्टं तस्मात्तत्परिवर्जयेत् ॥ 5

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



अनित्यानि शरीराणि, विभवो नैव शाश्वतः ।
नित्यं सन्निहितो मृत्युः, कर्तव्यो धर्मसंग्रहः ॥ 6

अनोकसंशयोच्छेदि परोक्षार्थस्य दर्शनम् ।
सर्वस्य लोचनं शास्त्रं यस्य नास्त्यन्ध एव सः ॥ 7

अन्नदाता भयत्राता विद्यादाता तथैव च ।
जविता चोपनेता च पञ्चैते पितरः स्मृताः ॥ 8

अपमानं पुरस्कृत्य मानं कृत्वा तु पृष्ठतः ।
स्वकार्यमुद्धरेत्प्राज्ञः कार्यध्वंसो हि मूर्खता ॥ 9

अभिवादनशीलस्य नित्यं वृद्धोपसेविनः ।
चत्वारि तस्य वर्धन्ते आयुर्विद्या यशो बलम् ॥ 10

अर्थातुराणां न गुरुर्न बन्धुः
कामातुराणां न भयं न लज्जा ।
विद्यातुराणां न सुखं न निद्रा
क्षुधातुराणां न रुचिर्न वेला ॥ 11

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः ।
एवं सामाजिकं धर्मं चातुर्वर्ण्येऽब्रवीन्मनुः ॥ 12

आचारः परमो धर्मः श्रुत्युक्तः स्मार्त एव च ।
तस्मादस्मिन्सदा युक्तो नित्यं स्यादात्मवान्द्विजः ॥ 13

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



आदौ माता गुरोः पत्नी ब्राह्मणी राजपत्निका ।
धेनुर्धात्री तथा पृथ्वी सप्तैते मातरः स्मृताः ।। 14

आपदां कथितः पन्था इन्द्रियाणामसंभवः ।
तज्जयः सम्पदां मार्गो येनेष्टं तेन गम्यताम् ।। 15

आप्तद्वेषाद्भवेन्मृत्युः परद्वेषाद्धनक्षयः ।
राजद्वेषाद्भवेन्नाशो ब्रह्मद्वेषात्कुलक्षयः ।। 16

उदारस्य तृणं वित्तं, शूरस्य मरणं तृणम् ।
विरक्तस्य तृणं भार्या निःस्पृहस्य तृणं जगत् ।। 17

उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः
दैवेन देयमिति कापुरुषा वदन्ति ।
दैवं निहत्य कुरु पौरुषमात्मशक्त्या
यत्ने कृते यदि न सिध्यति कोऽत्र दोषः ।। 18

उपकारः परो धर्मः, परार्थं कर्म नैपुणम् ।
पात्रे दानं परः कामः, परो मोक्षो वितृष्णता ।। 19

एकेन शुष्कवृक्षेण दह्यमानेन वह्निना ।
दह्यते हि वनं सर्वं कुपुत्रेण कुलं यथा ।। 20

एकेनापि सुवृक्षेण पुष्पितेन सुगन्धिना ।
वासितं स्याद्वनं सर्वं सुपुत्रेण कुलं यथा ।। 21

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



कोकिलानां स्वरो रूपं, नारीरूपं पतिव्रतम् ।
विद्या रूपं कुरूपाणां, क्षमा रूपं तपस्विनाम् ।। 22

कोऽतिभारः समर्थानां, किं दूरं व्यवसायिनाम् ।
को विदेशः सविद्यानां, कः परः प्रियवादिनाम् ।। 22

कोऽर्थः पुत्रेण जातेन यो न विद्वान् न भक्तिमान् ।
काणेन चक्षुषा किं वा चक्षुः पीडैव केवलम् ।। 23

कः कालः, कानि मित्राणि, को देशः, कौ व्ययागमौ ।
कस्याहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ।। 24

क्वचिद्रुष्टः कविचित्तुष्टो रुष्टस्तुष्टः क्षणे क्षणे ।
अव्यवस्थितचित्तस्य प्रसादोऽपि भयङ्करः ।। 25

गुणैरुत्तमतां याति नोच्चै रासनसंस्थितः ।
प्रासादशिखरस्थोऽपि काकः किं गरुडायते ।। 26

चलन्ति तारा रविचन्द्रमण्डलं
चलेच्च मेरुर्विचलेच्च मन्दरः ।
कदापि काले पृथिवी चलेच्च वै
चलेन्न धर्मः सुजनस्य वाचिकम् ।। 27

ताराणां भूषणं चन्द्रो, नारीणां भूषणं पतिः ।
पृथिव्या भषणं राजा, विद्या सर्वस्य भूषणम् ।। 28

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



त्यज दुर्जनसंसर्गं भज साधुसमागमम् ।
कुरु पुण्यमहोरात्रं; स्मर नित्यमनित्यताम् ॥ 29

दानेन पाणिर्न तु कङ्कणेन,
स्नानेन शुद्धिर्न तु चन्दनेन ।
मानेन तृप्तिर्न तु भोजनेन,
ज्ञानेन मुक्तिर्न तु मुण्डनेन ॥ 30

दुर्जनः परिहर्तव्यो विद्ययालंकृतोऽपि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ॥ 31

दुर्जनः प्रियवादी च नैतद्विश्वासकारणम् ।
मधु तिष्ठति जिह्वाग्रे हृदये तु हलाहलम् ॥ 32

दुर्लभं प्राकृतं मित्रं, दुर्लभः क्षेमकृत् सुतः ।
दुर्लभं सदृशी भार्या, दुर्लभः स्वजनः प्रियः ॥ 33

दृष्टिपूतं न्यसेत्पादं, वस्त्रपूतं जलं पिबेत् ।
सत्यपूतां वदेद्वाचं, मनःपूतं समाचरेत् ॥ 34

देवे तीर्थे द्विजे मन्त्रे दैवज्ञे भेषजे गुरौ ।
यादृशी भावना यस्य सिद्धिर्भवति तादृशी ॥ 35



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



धनधान्यप्रयोगेषु विद्यासंग्रहणेषु च ।
आहारे व्यवहारे च त्यक्तलज्जः सुखी भवेत् ॥ 36

धनानि जीवितं चैव परार्थे प्राज्ञ उत्सृजेत् ।
सन्निमित्ते वरं त्यागो विनाशे नियते सति ॥ 37

धनिकः श्रोत्रियो राजा नदी वैद्यश्च पञ्चमः ।
पञ्च यत्र न विद्यन्ते तत्र वासं न कारयेत् ॥ 38

धर्म एव हतो हन्ति, धर्मो रक्षति रक्षितः ।
तस्माद्धर्मो न हन्तव्यो, मा नो धर्मो हतोऽवधीत् ॥ 39

धृतिः क्षमा दमोऽस्तेयं शौचमिन्द्रियनिग्रहः ।
धीर्विद्या सत्यमक्रोधो दशकं धर्मलक्षणम् ॥ 40

न कश्चित् कस्यचिन्मित्रं, न कश्चित्कस्यचिद्रिपुः ।
व्यवहारेण जायन्ते मित्राणि रिपवस्तथा ॥ 41

न च विद्यासमो बन्धुर्न मुक्तेः परमा गतिः ।
न वैराग्यात्परं भाग्यं नास्ति त्यागसमं सुखम् ॥ 42

नाऽपृष्टः कस्यचिद् ब्रूयान्न चान्यायेन पृच्छतः ।
जानन्नपि हि मेधावी जडवल्लोक आचरेत् ॥ 43

नास्ति विद्यासमं चक्षुः, नास्ति सत्यसमं तपः ।
नास्ति रागसमं दुःखं, नास्ति त्यागसमं सुखम् ॥ 44

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



नास्ति स्त्रीणां पृथग्यज्ञो, न व्रतं, नाप्युपोषणम् ।
पतिं शुश्रूषते येन तेन स्वर्गे महीयते ।। 45

नित्यं स्नात्वा शुचिः कुर्याद्देवर्षिपितृतर्पणम् ।
देवताभ्यर्चनं चैव समिदाधानमेव च ।। 46

पठतो नास्ति मूर्खत्वं, जपतो नास्ति पातकम् ।
जाग्रतस्तु भयं नास्ति, कलहो नास्ति मौनिनः ।। 47

पण्डिते च गुणास्सर्वे, मूर्खे दोषा हि केवलम् ।
तस्मान्मूर्खसहस्रेभ्यः प्राज्ञ एको विशिष्यते ।। 48

पयः पानं भुजङ्गानां केवलं विषवर्धनम् ।
उपदेशो हि मूर्खाणां प्रकोपाय न शान्तये ।। 49

परदारान् परद्रव्यं परीवादं परस्य च ।
परिहासं गुरोः स्थाने चापल्यं च विवर्जयेत् ।। 50

परोपकरणं येषां जागर्ति हृदये सताम् ।
नश्यन्ति विपदस्तेषां सम्पदः स्युः पदे पदे ।। 51

परोक्षे कार्यहन्तारं प्रत्यक्षे प्रियवादिनम् ।
वर्जयेत्तादृशं मित्रं विषकुम्भं पयोमुखम् ।। 52

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



पादपानां भयं वातात्, पद्मानां शिशिराद्भयम् ।
पर्वतानां भयं वज्रात्, साधूनां दुर्जनाद्भयम् ॥ 53

पादाभ्यां न स्पृशेदग्निं, गुरुं ब्राह्मणमेव च ।
नैव गां च कुमारीं च न वृद्धं न शिशुं तथा ॥ 54

पानं दुर्जनसंसर्गः पत्या च विरहोऽटनम् ।
स्वप्नोऽन्यगेहवासश्च नारीणां दूषणानि षट् ॥ 55

पित्रोर्नित्यं प्रियं कुर्यादाचार्यस्य च सर्वदा ।
तेष्वेव त्रिषु तुष्टेषु तपः सर्वं समाप्यते ॥ 56

पुस्तकेषु च या विद्या परहस्तेषु यद्धनम् ।
उत्पन्नेषु च कार्येषु न सा विद्या न तद्धनम् ॥ 57

प्रविचार्योत्तरं देयं, सहसा न वदेत् क्वचित् ।
शत्रोरपि गुणा ग्राह्या, दोषास्त्याज्या गुरोरपि ॥ 58

प्रियवाक्यप्रदानेन सर्वे तुष्यन्ति जन्तवः ।
तस्मात्तदेव वक्तव्यं वचने का दरिद्रता ॥ 59

ब्रह्महत्या सुरापानं स्तेयं गुर्वङ्गनागमः ।
महान्ति पातकान्याहुः संसर्गश्चापि तैः सह ॥ 60

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



मनस्यन्यद् वचस्यन्यत् कर्मण्यन्यद् दुरात्मनाम् ।
मनस्येकं वचस्येकं कर्मण्येकं महात्मनाम् ।। 61

मातापितृभ्यां जामीभिर्भ्रात्रा पुत्रेण भार्यया ।
दुहित्रा दासवर्गेण विवादं न समाचरेत् । 62

माता यस्य गृहे नास्ति भार्या चाऽप्रियवादिनी ।
अरण्यं तेन गन्तव्यं यथाऽरण्यं तथा गृहम् ।। 63

मातृवत्परदारेषु परद्रव्येषु लोष्ठवत् ।
आत्मवत्सर्वभूतेषु यः पश्यति स पण्डितः ।। 64

मातेव रक्षति, पितेव हिते नियुंक्ते,
कान्तेव चाभिरमयत्यपनीय खेदम् ।
लक्ष्मीं तनोति, वितनोति च दिक्षु कीर्तिं,
किं किं न साधयति कल्पलतेव विद्या ।। 65

मात्रा समं नास्ति शरीरपोषणं,
चिन्तासमं वास्ति शरीरशोषणम् ।
भार्यासमं वास्ति शरीरतोषणं,
विद्यासमं नास्ति शरीरभूषणम् ।। 66



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



मित्रं स्वच्छतया, रिपुं नवबलै, र्लुब्धं धनै, रीश्वरं
कार्येण, द्विजमादरेण, युवतिं प्रेम्णा, समैर्बान्धवान् ।
अत्युग्रं स्तुतिभि, र्गुरुं प्रणतिभि, र्मूर्खं कथाभि र्बुधम्
विद्याभी, रसिकं रसेन, सकलं शीलेन कुर्याद्वशम् ।। 67

मूर्खा यत्र न पूज्यन्ते, धान्यं यत्र सुसञ्चितम् ।
दम्पत्योः कलहो नास्ति, तत्र श्रीः स्वयमागता ।। 68

मौनान् मूकः, प्रवचनपटुश्चाटुलो अल्पको वा,
धृष्टः पार्श्वे वसति च तदा, दूरतश्चाप्रगल्भः ।
क्षान्त्या भीरु र्यदि न सहते, प्रायशो नाऽभिजातः,
सेवाधर्मः परमगहनो योगिनामप्यगम्यः ।। 69

यथा चतुर्भिः कनकं परीक्ष्यते
निघर्षणच्छेदनतापताडनैः ।
तथा चतुर्भिः पुरुषः परीक्ष्यते
श्रुतेन शीलेन कुलेन कर्मणा ।। 70

यद्दुस्तरं यद्दुरापं यद्दुर्गं यच्च दुष्करम् ।
सर्वं तु तपसा साध्यं तपो हि दुरतिक्रमम् ।। 71

यावत्स्वस्थमिदं कलेवरगृहं यावच्च दूरे जरा
यावच्चेन्द्रियशक्तिरप्रतिहता यावत्क्षयो वायुषः ।
आत्मश्रेयसि तावदेव विदुषा कार्यः प्रयत्नो महान्
प्रोद्दीप्ते भवने च कूपखननं प्रत्युद्यमः कीदृशः ।। 72

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



येषां न विद्या न तपो न दानं
ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूता
मनुष्यरूपेण मृगाश्चरन्ति ।। 73

यं मातापितरौ क्लेशं सहेते संभवे नृणाम् ।
न तस्य निष्कृतिः शक्या कर्तुं वर्षशतैरपि ।। 74

राजा धर्ममृते द्विजः सवमृते विद्यामृते योगिनः
कान्ता सत्त्वमृते हयो गतिमृते भूषा च शोभामृते ।
योद्धा शूरमृते तपो व्रतमृते गीतं च पद्यान्यृते
भ्राता स्नेहमृते नरो हरिमृते लोके न भाति क्वचित्।।

रूपयौवनसम्पन्ना विशालकुलसम्भवाः ।
विद्याहीना न शोभन्ते निर्गन्धा इव किंशुकाः ।। 76

रे रे चातक सावधानमनसा मित्र क्षणं श्रूयतां
अम्भोदा बहवो वसन्ति गगने सर्वेऽपि नैतादृशाः ।
केचिद्वृष्टिभिरार्द्रयन्ति वसुधां गर्जन्ति केचिद् वृथा
यं यं पश्यसि तस्य तस्य पुरतो मा ब्रूहि दीनं वचः ।।

ललितान्तानि गीतानि, कुवाक्यान्तं च सौहृदम् ।
प्रणामान्तः सतां कोपो, याचनान्तं हि गौरवम् ।। 78

लालयेत् पञ्चवर्षाणि, दशवर्षाणि ताडयेत् ।
प्राप्ते तु षोडशे वर्षे पुत्रं मित्रवदाचरेत् ।। 79

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



वह्निस्तस्य जलायते जलनिधिः कुल्यायते तत्क्षणात्,
मेरुः स्वल्पशिलायते, मृगपतिः सद्यः कुरङ्गायते ।
व्यालो माल्यगुणायते, पीयूषवर्षायते,
यस्याङ्गेऽखिललोकवल्लभतमं शीलं समुन्मीलति ॥ 80

विद्यातीर्थे जगति विबुधाः, साधवः सत्यतीर्थे,
गङ्गातीर्थे मलिनमनसो योगिनो ध्यानतीर्थे
धारातीर्थे धरणिपतयो, दानतीर्थे धनाढ्या,
लज्जातीर्थे कुलयुवतयः पातकं क्षालयन्ते ॥ 81

विद्या नाम नरस्य रूपमधिकं, प्रच्छन्नगुप्तं धनं,
विद्या भोगकरी, यशस्सुखकरी, विद्या गुरूणां गुरुः ।
विद्या बन्धुजनो विदेशगमने, विद्या परं दैवतं,
विद्या राजसु पूजिता, न तु धनं विद्याविहीनः पशुः ॥

विद्या मित्रं प्रवासेषु, माता मित्रं गृहेषु च ।
व्याधितस्यौषधं मित्रं, धर्मो मित्रं मृतस्य च ॥ 83

विद्वत्वञ्च नृपत्वञ्च नैव तुल्यं कदाचन ।
स्वदेशे पूज्यते राजा, विद्वान् सर्वत्र पूज्यते ॥ 84

विप्रयोर्विप्रवह्नयोश्च दम्पत्योः स्वामिभृत्ययोः ।
अन्तरेण न यन्तव्यं हलस्य वृषभस्य च ॥ 85

विषादप्यमृतं ग्राह्यं, बालादपि सुभाषितम् ।
अमित्रादपि सद्वृत्तं, ममेध्यादपि काञ्चनम् ॥ 86

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



वृथा वृष्टिः समुद्रेषु, वृथा तृप्तस्य भोजनम् ।
वृथा दानं समर्थस्य, वृथा दीपो दिवापि च ।। 87

वृक्षं क्षीणफलं त्यजन्ति विहगाः शुष्कं सरः सारसाः,
पुष्पं पर्युषितं त्यजन्ति मधुपा, दग्धं वनान्तं मृगाः ।
निर्द्रव्यं पुरुषं त्यजन्ति गणिका, भ्रष्टश्रियं मन्त्रिणः
सर्वः कार्यवशाज्जनोऽभिरमते, कस्याऽस्ति को वल्लभः।।

वेदः स्मृतिः सदाचारः स्वस्य च प्रियमात्मनः ।
एतच्चतुर्विधं प्राहुः साक्षाद्धर्मस्य लक्षणम् ।। 89

शरीरस्य गुणानां च दूरमत्यन्तमन्तरम् ।
शरीरं क्षणविध्वंसि कल्पान्तस्थायिनो गुणाः ।। 90

शान्तितुल्यं तपो नास्ति, न सन्तोषात् परं सुखम् ।
न तृष्णायाः परो व्याधि र्न च धर्मो दयासमः ।। 91

शोकस्थानसहस्राणि भयस्थानशतानि च ।
दिवसे दिवसे मूढमाविशन्ति, न पण्डितम् ।। 92

श्रुतिस्तु वेदो विज्ञेयो, धर्मशास्त्रं तु वै स्मृतिः ।
ते सर्वार्थेष्वमीमांस्ये, ताभ्यां धर्मो हि निर्बभौ ।। 93

श्रुतिस्मृत्युदितं धर्ममनुतिष्ठन् हि मानवः ।
इह कीर्तिमवाप्नोति प्रेत्य चानुत्तमं सुखम् ।। 94

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



षड् दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्रा भयं क्रोध आलस्यं दीर्घसूत्रता ।। 95

स जीवति गुणा यस्य धर्मो यस्य च जीवति ।
गुणधर्मविहीनस्य जीवनं निष्प्रयोजनम् ।। 96

सत्यं ब्रूयात्प्रियं ब्रूयान्नब्रूयात्सत्यमप्रियम् ।
प्रियं च नानृतं ब्रूयादेष धर्मः सनातनः ।। 97

सत्येव धार्यते पृथ्वी सत्येन तपते रविः ।
सत्येन वायवो वान्ति, सर्वं सत्ये प्रतिष्ठितम् ।। 98

सत्सङ्गः केशवे भक्तिर्गङ्गाम्भसि निमज्जनम् ।
असारे खलु संसारे त्रीणि साराणि भावयेत् ।। 99

सदा प्रसन्नं मुखमिष्टवाणी
सुशीलता च स्वजनेषु सख्यम् ।
सतां प्रसंगः कुलहीनहानि
चिह्नानि देहे त्रिदिवस्थितानाम् ।। 100

सन्तोषस्त्रिषु कर्तव्यः स्वदारे भोजने धने ।
त्रिषु चैव न कर्तव्योऽध्ययने जपदानयोः ।। 101

समुद्रावरणा भूमिः, प्राकारावरणं गृहम् ।
वरेन्द्रावरणो देशः चरित्रावरणाः स्त्रियः ।। 102

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



सर्प क्रूरः खलः क्रूरः, सर्पात्क्रूरतरः खलः ।
मन्त्रौषधिवशः सर्पः खलः केन निवार्यते ।। 103

सर्वे तस्यादृता धर्मा यस्यैते *त्रय आदृताः ।
अनादृतास्तु यस्यैते सर्वास्तस्याऽफलाः क्रियाः ।। 104

सर्वं परवशं दुःखं, सर्वमात्मवशं सुखम्।
एतद्विद्यात्समासेन लक्षणं सुखदुःखयो. ।। 105

सहसा विदधीत न क्रिया-
मविवेकः परमापदां पदम् ।
वृणुते हि विमृश्यकारिणं
गुणलुब्धाः स्वयमेव सम्पदः ।। 106

साधूनां दर्शनं पुण्यं, तीर्थभूता हि साधवः ।
तीर्थं फलति कालेन, सद्यः साधुसमागमः ।। 107

सुजीर्णमन्नं सुविचक्षणः सुतः
सुशासिता स्त्री नृपतिः सुसेवितः।
सुचिन्त्य चोक्तं सुविचार्य यत्कृतं
सुदीर्घकालेऽपि न याति विक्रियाम् ।। 108

सुभिक्षं कृषके नित्यं नित्यं सुखमरोगिणः ।
भार्या भर्तुः प्रिया यस्य तस्य नित्योत्सवं गृहम् ।। 109

*माता पिता आचार्यश्च ।

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center



सुलभाः पुरुषा लोके सततं प्रियवादिनः ।
अप्रियस्य च पथ्यस्य वक्ता श्रोता च दुर्लभः ।। 110

स्वगृहे पूज्यते मूर्खः स्वग्रामे पूज्यते प्रभुः ।
स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते ।। 111

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
कर्णस्य भूषणं शास्त्रं, भूषणैः किं प्रयोजनम् ।। 112

ओङ्कारं बिन्दुसंयुक्तं नित्यं ध्यायन्ति योगिनः ।
कामदं मोक्षदं चैव ओङ्काराय नमो नमः ।। 113

हरिः ॐ तत्सत्

इति नीतिचन्द्रिका



CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

# प्रातः स्मरणम्

प्रातर्नमामि गणनाथ बन्धुं
सिन्दूरपूर परिशोभितगण्डयुग्मम् ।
उद्दण्डविघ्नपरिखण्डनचण्डदण्ड -
माखण्डलादिसुरनायकबृन्दवन्द्यम् ।। 1

प्रातर्भजामि भजता मभयङ्करं तं
प्राक्सर्वजन्मकृतपापभयापहर्त्यै ।
यो ग्राहवक्त्रपतिताङ्घ्रिगजेन्द्रघोर-
शोकप्रणाशनकरो धृतशङ्खचक्रः ।। 2

प्रातर्नमामि खलु तत्सवितुर्वरेण्यं
रूपं हि मण्डलमृचोऽथ तनुर्यजूंषि ।
सामानि यस्य किरणाः प्रभवादि हेतुं
ब्रह्माहरात्मकमलक्ष्य मचिन्त्यरूपम् ।। 3

प्रातर्भजामि भजतामभिलाषदात्री
धात्रीं समस्तजगतां दुरितापहन्त्रीम् ।
संसारबन्धनविमोचनहेतुभूतां
मायां परां समधिगम्य परस्य विष्णोः ।। 4

प्रातर्नमामि भवभीतहरं सुरेशं
गङ्गाधरं वृषभवाहनमम्बिकेशम् ।
खट्वाङ्गशूलवरदाभयहस्तमीशं
संसाररोगहरमौषधमद्वितीयम् ।। 5

CC-0. In Public Domain. Cuddalore Collection. TN.

Digitization by eGangotri-South Center

# सुप्रभातम्

ब्रह्मा मुरारि स्त्रिपुरान्तकारी
भानुः शशी भूमिसुतो बुधश्च ।
गुरुश्च शुक्रः शनिराहुकेतवः
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ 1

सनत्कुमारः सनकः सनन्दनः
सनातनोऽप्यासुरिपिङ्गलौ च ।
सप्तस्वराः सप्तरसातलानि
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ 2

सप्तार्णवाः सप्तकुलाचलाश्च
सप्तर्षयो द्वीपवनानि सप्त ।
भूरादिकृत्वा भुवनानि सप्त
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ 3

पृथ्वी सगन्धा सरसास्तथापः
स्पर्शी च वायुर्ज्वलनं च तेजः ।
नभः सशब्दं महसा सहैव
कुर्वन्तु सर्वे मम सुप्रभातम् ॥ 4

वामनपु[illegible]गम्

CC-0. In Public Domain. Cuddalore Collection. TN.